॥ श्रीगुरुभ्यो नमः ॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

॥ श्रीमच्चरणवैभवायै नमः ॥

# ॥ श्रीयाज्ञवल्क्याष्टोत्तरशतनामावलिः ॥

ॐ अस्य श्रीयाज्ञवल्क्याष्टोत्तरशतनाम-महामन्त्रस्य,
कात्यायन ऋषिः, अनुष्टुप् छन्दः, श्रीयाज्ञवल्क्यो देवता ,
ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं,
मम श्रीयाज्ञवल्क्यप्रसादसिद्ध्यर्थे (जपे) अर्चनायां विनियोगः॥

ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः ।
ह्रूं मध्यमाभ्यां नमः । ह्रैं अनामिकाभ्यां नमः ।
ह्रौं कनिष्ठिकाभ्यां नमः। ह्रः करतलकरपृष्ठाभ्यां नमः ।

---------------------------------------

ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुं । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् ।
ॐ भूर्भुवःस्वरों इति दिग्बन्धः।

## ध्यानम् :

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभम् ॥
जितेन्द्रियं जितक्रोधं सदाध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दमुनीश्वरम् ॥

प्रणम्याद्यं दिनमणिं योगीश्वरशिरोमणिम् ।
सर्वज्ञं याज्ञवल्क्यं तच्छिष्यं कात्यायनं मुनिम् ॥

लं पृथिव्यात्मने गन्धान् धारयामि । हं आकाशात्मने पुष्पैः पूजयामि । यं वाय्वात्मने धूपं आघ्रापयामि । रं वह्न्यात्मने दीपं दर्शयामि । वं अमृतात्मने दिव्यामृतं महानैवेद्यं निवेदयामि। सं सर्वात्मने समस्तराजोपचारान् देवोपचारान् समर्पयामि ॥

## ॥ अथ नामावलिः ॥

१ ॐ श्रीयाज्ञवल्क्याय नमः ।
२ ॐ ब्रह्मिष्ठाय नमः ।
३ ॐ जनकस्य गुरवे नमः
४ ॐ लोकाचार्याय नमः ।
५ ॐ ब्रह्ममनोजाय नमः ।
६ ॐ योगिनां पतये नमः ।
७ ॐ शाकल्यप्राणदात्रे नमः ।
८ ॐ मैत्रेयीज्ञानदाय नमः ।
९ ॐ महते नमः ।
१० ॐ कात्यायनीप्रियाय नमः।
११ ॐ शान्ताय नमः ।
१२ ॐ शरणत्राणतत्पराय नमः।
१३ ॐ धर्मशास्त्रप्रणेत्रे नमः
१४ ॐ ब्रह्मविदे नमः ।
१५ ॐ ब्राह्मणोत्तमाय नमः ।
१६ ॐ योगीश्वराय नमः ।
१७ ॐ योगमूर्तये नमः ।
१८ ॐ योगशास्त्रप्रवर्तकाय नमः।

१९ ॐ भूतानां गतागतज्ञाय नमः ।
२० ॐ विद्याविद्याविभागविदे नमः ।
२१ ॐ भगवते नमः ।
२२ ॐ शास्त्रतत्वज्ञाय नमः ।
२३ ॐ तपस्विशरणाय नमः ।
२४ ॐ विभवे नमः ।
२५ ॐ तत्वज्ञानप्रदात्रे नमः
२६ ॐ सर्वज्ञाय नमः ।
२७ ॐ करुणात्मवते नमः ।
२८ ॐ सन्यासिनां आदिमाय नमः ।
२९ ॐ सूर्यशिष्याय नमः ।
३० ॐ जितेन्द्रियाय नमः ।
३१ ॐ अयातयामसंज्ञायां-
प्रवर्तनपराय नमः ।
३६ ॐ दृढव्रताय नमः ।
३२ ॐ गुरवे नमः ।
३३ ॐ वाजिविप्रोत्तमाय नमः।
३४ ॐ सत्याय नमः ।
३५ ॐ सत्यवादिने नमः

३६ ॐ दृढव्रताय नमः ।
३७ ॐ धातृप्रसादसंलब्धगायत्री-
महिमामतये नमः ।
३८ ॐ गार्गीस्तुताय नमः ।
३९ ॐ धर्मपुत्रयागाध्वर्यवे नमः ।
४० ॐ विचक्षणाय नमः ।
४१ ॐ दुष्टराज्ञां शापदात्रे नमः ।
४२ ॐ शिष्टानुग्रहकारकाय नमः ।
४३ ॐ अनन्तगुणरत्नाढ्याय नमः।
४४ ॐ भवसागरतारकाय नमः।
४५ ॐ स्मृतिमात्रात् पापहन्त्रे नमः ।
४६ ॐ ज्योतिषे नमः ।
४७ ॐ ज्योतिर्विदां वराय नमः।
४८ ॐ विश्वाचार्याय नमः ।
४९ ॐ विष्णुरूपाय नमः ।
५० ॐ विश्वप्रियहिते रताय नमः।
५१ ॐ श्रुतिप्रसिद्धाय नमः ।
५२ ॐ सिद्धात्मने नमः ।
५३ ॐ समचित्ताय नमः ।

५४ ॐ कलाधराय नमः ।
५५ ॐ आदित्यरूपाय नमः ।
५६ ॐ आदित्यसहिष्णवे नमः ।
५७ ॐ मुनिसत्तमाय नमः ।
५८ ॐ सामश्रवादिशिष्यैश्च
पूजिताङ्घ्रये नमः ।
५९ ॐ दयानिधये नमः ।
६० ॐ ब्रह्मरातसुताय नमः ।
६१ ॐ श्रीमते नमः ।
६२ ॐ पङ्क्तिपावनपावनाय नमः ।
६३ ॐ संशयस्यापि सर्वस्य
निवर्तनपराय नमः।
६४ ॐ सनकादिमहायोगि-
पूजिताय नमः ।
६५ ॐ पुण्यकृत्तमाय नमः ।
६६ ॐ सूर्यावताराय नमः ।
६७ ॐ शुद्धात्मने नमः ।
६८ ॐ यज्ञनारायणांशभृते नमः ।
६९ ॐ आदिवैदेहशालाङ्ग-
ऋषिजेत्रे नमः ।

७० ॐ त्रयीमयाय नमः ।
७१ ॐ होताश्वलमुनिप्राप्त-
प्रभावाय नमः ।
७२ ॐ कार्यसाधकाय नमः ।
७३ ॐ शरणागतवैदेहाय नमः
७४ ॐ कृपालवे नमः ।
७५ ॐ लोकपावनाय नमः ।
७६ ॐ ब्रह्मिष्ठप्रवराय नमः ।
७७ ॐ दान्ताय नमः ।
७८ ॐ वेदवेद्याय नमः ।
७९ ॐ महामुनये नमः ।
८० ॐ वाजिने नमः ।
८१ ॐ वाजसनेयाय नमः ।
८२ ॐ वाजिविप्रकृताधिकृते नमः।
८३ ॐ कल्याणदाय नमः ।
८४ ॐ यज्ञराशये नमः ।
८५ ॐ यज्ञात्मने नमः ।
८६ ॐ यज्ञवत्सलाय नमः ।
८७ ॐ यज्ञप्रधानाय नमः ।

८८ ॐ यज्ञेशप्रीतिसंजननाय नमः ।

८९ ॐ ध्रुवाय नमः ।

९० ॐ कृष्णद्वैपायनाचार्याय नमः ।

९१ ॐ ब्रह्मदत्तप्रसादकाय नमः ।

९२ ॐ शाण्डिल्यविद्याप्रभृति-
विद्यावादेषु निष्ठिताय नमः ।

९३ ॐ अज्ञानान्धतमःसूर्याय नमः।

९४ ॐ भगवद्ध्यानिरताय नमः।

९५ ॐ त्रयीमयाय नमः ।

९६ ॐ गवान्नेत्रे नमः ।

९७ ॐ जयशीलाय नमः ।

९८ ॐ प्रभाकराय नमः

९९ ॐ वैशम्पायनशिष्यानां-
तैत्तरीयत्वदायकाय नमः।

१०० ॐ कण्वादिभ्योऽयातयाम-
शाखाध्यापयितृत्वभाजे नमः ।

१०१ ॐ पङ्क्तिपावनविप्रेड्याय नमः ।

१०२ ॐ परमात्मैकबुद्धिमते नमः ।

१०३ ॐ तेजोराशये नमः ।

१०४ ॐ पिशङ्गाक्षाय नमः ।

१०५ ॐ परिव्राजकराजे नमः ।

१०६ ॐ मुनये नमः ।

१०७ ॐ नित्याऽनित्यविभागज्ञाय
नमः ।

१०८ ॐ सत्याऽसत्यविभागविदे नमः ।

॥ श्रीमैत्रेयी-कात्यायनी-समेत-श्रीयाज्ञवल्क्यपरब्रह्मणे नमः॥
॥ अष्टोत्तरशतनामार्चनपूजां समर्पयामि ॥

=====================================

--- " ह्रां हृदयाय नमः" इत्यारभ्य पुनरपि हृदयादि न्यासः ।

--- भूर्भुवस्स्वरोमिति दिग्विमोकः ।

--- “ वन्देऽहं मङ्गलात्मानं ---------योगानन्दमुनीश्वरम् ”

इति श्लोकद्वयेन श्रीयोगीश्वरयाज्ञवल्क्य-ध्यानम् ।

--- लमित्यादि मानसीक-पञ्चोपचाराः ।

॥ इत्यादित्यपुराणे उत्तरखण्डे सनत्कुमारसंहितायां गौतममुनिवृन्द-संवादे श्रीयाज्ञवल्क्यस्य नाम्नां अष्टोत्तरशतं संपूर्णम् ॥

(Note: This Ashtottaram is taken from the Book “ Sri Yogeeshwara Yaagnavalkya Sahasranaamaavali ” published by Vaiganallur Shri Sukla Yajurveda Sastra Mahapatasalai, in the year 1968.)

============॥ शिवार्पणमस्तु ॥==========